निपातः ।) उपदीकाकृतमृत्तिकास्तूपः । तत्पर्य्यायः । वामलूरः २ नाकुः ३ । इत्यमरः ॥ इक्षिकः ४ वाल्मीकः ५ वाल्मीकिः ६ वाल्मिकिः ७ । इति तट्टीकायां भरतः ॥ पुत्तलकः ८ शक्रमूर्द्धा ९ क्रिमिशैलकः १० । इति शब्दरत्नावली ॥ * ॥ (यथा, मेघदूते । १५ ।
"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ॥")
तन्मृत्तिकया शौचनिषेधो यथा । विष्णुपुराणम् ।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम् ।
अन्तःप्राण्यवपन्नाच्च हलोत्खातां न कर्द्दमाम् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
देवप्रतिष्ठायां स्नानात् पूर्व्वं शिल्पिदोषशान्त्यर्थं तन्मृत्तिकया चालनं यथा,—
"वल्मीकमृत्तिकाभिस्तु गोमयेन सुभस्मना ।
चालयेत् शिल्पिसंस्पर्शदोषाणामुपशान्तये ॥"
वल्मीकमृदादिस्नाने मन्त्रविशेषानुपादानात् मन्त्रानादेशे गायत्त्रीति शूलपाणिलिखितात् गायत्त्र्या तत्तन्मूलमन्त्रेण वा स्नानं कारयितव्यम् । तथा स्नानं यथा,—
"स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चामृतैः पञ्चगव्यैः पञ्चमृत्पिण्डकैरपि ॥
मृत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च ।
कुशवल्मीकसम्भूतं मृत्पञ्चकमुदीरितम् ॥"
इति देवप्रतिष्ठातत्त्वम् ॥
वल्मीकः, पुं, (वल्मीक उपदीकाकृतमृत्तिकास्तूपः उत्पत्तिकारणत्वेनास्त्यस्येति । अच् ।) वाल्मीकिमुनिः । रोगविशेषः । इति विश्वः ॥ अथ वल्मीकरोगस्य लक्षणम् ।
"ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः ।
ग्रन्थिः स वल्मीकवदक्रियाणां
जातः क्रमेणैव गतप्रवृद्धिः ॥
मुखैरनेकैः स्रुतितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं
निष्प्रत्यनीकं चिरजं विशेषात् ॥"
ग्रीवा कृकाटिका । अंसः स्कन्धः । कक्षा बाहुमूलम् । गलः कण्ठः । वल्मीकवदित्यनेन प्रचुरशिखरत्वमुच्चत्वमवगाढमूलत्वञ्च सूच्यते । निष्प्रत्यनीकं उपचारायोग्यम् ॥ * ॥ अथ तस्य चिकित्सा ।
"शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ।
विधानेनार्व्वुदोक्तेन शोधयित्वा च रोपयेत् ॥
वल्मीकन्तु भवेद्यस्य नातिवृद्धममर्म्मजम् ।
तत्र संशोधनं कृत्वा शोणितं मोक्षयेद्भिषक् ॥
कुलत्थिकानां मूलेन गुडूच्या लवणेन च ।
आरेवतस्य मूलेन दन्तीमूलैस्तथैव च ॥
श्यामामूलैः सपत्रैः शक्तुमिश्रैः प्रलेपयेत् ।
सुस्निग्धेन सुखोष्णेन भिषक् तमुपनाहयेत् ॥
पक्वं तद्वा विजानीयाद्गतीः सर्व्वा यथाक्रमम् ।
अभिज्ञाय गतीश्छित्त्वा प्रदिह्यान्मतिमान् भिषक् ॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ।
व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान् भिषक् ॥
मनःशिलालभल्लातकसूक्ष्मैलागुरुचन्दनैः ।
जातीपल्लवतक्रेण निम्बतैलं विपाचयेत् ॥
वल्मीकं नाशयेत्तद्धि बहुच्छिद्रं बहुव्रणम् ।
पाणिपादोपरिष्टात्तु छिद्रैर्बहुभिरावृतम् ॥
वल्मीकं यत् सशोफं स्यादसाध्यं तद्धि विजानता ॥"
मनःशिलाद्यं तैलम् । इति भावप्रकाशः ॥
(अस्य मृदो व्यवहारेण रोगनाशित्वं यथा,—
"क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतं भिषक् ।
गाढमुत्सादनं कुर्य्यादूरुस्तम्भे प्रलेपनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ऊरुस्तम्भाधिकारे ॥)
वल्मीकिः, पुं, वल्मीकः । इति शब्दमाला ॥
वल्मीकशीर्षं, क्ली, (वल्मीकस्य शीर्षमिव शीर्षमस्य ।) स्रोतोऽञ्जनम् । इति राजनिर्घण्टः ॥
वल्मीकूटं, क्ली, (वल्मीकस्य वल्मीकसञ्चितं वा कूटम् ।) वल्मीकः । इति हेमचन्द्रः ॥
वल्युल } तु क लूनिपूत्योः । इति कविकल्पद्रुमः ॥
वल्यूल } (अदन्तचुरा०-पर०-सक०-सेट् ।)
वल्यूलयति अववल्यूलत् । इति दुर्गादासः ॥
वल्ल, ङ संवरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वल्लते धनं लोकः संवृणोतीत्यर्थः । इति दुर्गादासः ॥
वल्लः, पुं, (वल्लते संवृणोतीति । वल्ल + अच् ।) गुञ्जात्रयपरिमाणम् । यथा,—
"वल्लस्त्रिगुञ्जो धरणञ्च तेऽष्टौ ।"
इति लीलावती ॥
द्विगुञ्जा । इति वैद्यकपरिभाषा । (यथा,—
"विषटङ्कवलिञ्चेच्छदन्तीबीजं क्रमादिदम् ।
दन्त्यम्बुमर्द्दितं यामं रसस्त्रिपुरभैरवः ॥
वल्लं योचित चार्द्रस्य रसे च सितया सह ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
सार्द्धगुञ्जा । यथा,—
"गोधूमद्वितयोन्मिता तु कथिता गुञ्जा तया सार्द्धया
वल्लो वल्लचतुष्टयेन भिषजां माषा मतस्तच्चतुः ।"
इत्यादि राजनिर्घण्टः ॥
वल्लकी, स्त्री, (वल्लते इति । वल्ल + वुन् । गौरादित्वात् ङीष् ।) वीणा । इत्यमरः ॥ (यथा, हरिवंशे । ८४ । १११ ।
"वल्लकीं वाद्यमानो हि सप्तस्वरविमूर्च्छिताम् ॥")
शल्लकीवृक्षः । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा ।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वल्लभः, पुं, (वल्ल संवरणे + "रासिवल्लिभ्यश्च ।" उणा० ३ । १२५ । इति अभच् ।) दयितः । अध्यक्षः । सल्लक्षणतुरङ्गमः । इति मेदिनी । भे, १८ ॥ (जह्नुवंशीयवलाकाश्वस्य पुत्रः । स च कुशिकस्य पिता । यथा, महाभारते । १३ । ४ । ५ ।
"वल्लभस्तस्य तनयः साक्षाद्धर्म्म इवापरः ।
कुशिकस्तस्य तनयः सहस्राक्षसमद्युतिः ॥")
वल्लभः, त्रि, (वल्ल + अभच् ।) प्रियः । (यथा, कामन्दकीयनीतिसारे । ५ । १९ ।
"पुत्त्रेभ्यश्च नमस्कुर्य्यात् वल्लभेभ्यश्च भूपतिः ॥")
अध्यक्षः । इत्यमरः ॥ अध्यक्षोऽत्र गवाध्यक्षः । इति स्वामी ॥
वल्लभपालकः, त्रि, (वल्लभानां अश्वविशेषाणां पालकः ।) अश्वरक्षकः । इति भूरिप्रयोगः ॥
वल्लभा, स्त्री, प्रिया । यथा,—
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया ।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा ॥"
इति हेमचन्द्रः ॥
वल्लरं, क्ली, (वल्लते इति । वल्ल + अरन् ।) श्यामागुरुः । इति राजनिर्घण्टः ॥ मञ्जरिः । इति शब्दरत्नावली ॥ गहनम् । कुञ्जम् । इति धरणिः ॥
वल्लरिः } स्त्री, (वल्ल + क्विप् । वल्लं संवरणं
वल्लरी } ऋच्छतीति । ऋ + अच इः । कृदिकारादिति वा ङीष् ।) मञ्जरी । इत्यमरभरतौ ॥ (लता । यथा, कुमारे । ४ । ३१ ।
"अनपायिनि संश्रयद्रुमे
गजभग्ने पतनाय वल्लरी ॥")
चित्रमूलम् । मेथिका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"मेथिका मिथिनिर्मेथिर्दीपनी बहुपुत्त्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पित्तजिद्वायुसुद्विधा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वल्लवः, पुं, (वल्ल प्रीतौ + क्विप् । वल्लं प्रीतिं वातीति । वा + कः ।) गोपः । इत्यमरः ॥ (यथा, माघे । ११ । ८ ।
"द्रुततरकरदक्षाः क्षिप्रवैशाखशैले
दधति दधनि धीरानारवान् वारिणीव ।
शशिनमिव सुरौघाः सारमुद्धर्त्तुमेते
कलशिमुदधिगुर्व्वीं वल्लवा लोडयन्ति ॥")
भीमसेनः । इति मेदिनी । वे, ४४ ॥ (विराटनगरे छद्मवासकाले एवास्य एतन्नाम आसीत् । यथा महाभारते । ४ । २ । १ ।
"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम भारत ।
उपस्थास्यामि राजानं विराटमिति मे मतिः ॥")
वल्लवः, त्रि, (वल्लमानन्दं वातीति । वा + कः ।) सूपकारः । इत्यमरः ॥
वल्लवी, स्त्री, (वल्लव + ङीष् ।) वल्लवजातिस्त्री । वल्लवपत्नी । तत्पर्य्यायः । आभीरी २ गोपिका ३ गोपी ४ महाशूद्री ५ गोपालिका ६ । इति शब्दरत्नावली ॥ (यथा, किराते । ४ । १७ ।